भ्रातॄणां न प्रशंसन्ति साधवः। गुरुशास्त्रेऽनिबद्धाना-मन्योऽन्येनाभिशङ्किनाम्। नियन्तुं नहि शक्यस्त्वं भेदतो धनमिच्छसि। यस्मात्तस्मात् सुप्रतीक! हस्तित्वं समवाप्स्यसि। शप्तस्त्वेवं सुप्रतीको विभावसुमथाब्रवीत्। त्वमप्यन्तर्जलचरः कच्छपः सम्भविष्यसि। एवमन्योऽन्य-शापात्तौ सुप्रतीकविभावसू। गजकच्छपतां प्राप्तावर्थार्थं मूढचेतसौ। रोषदोषानुषङ्गेण तिर्य्यग्योनिगतावुभौ। परस्परद्वेषरतौ प्रमाणबलदर्पितौ। सरस्यस्मिन्महा-कायौ पूर्ववैरानुसारिणौ। तयोरन्यतरः श्रीमान् समु-पैति महागजः। यस्य बृंहितशब्देन कूर्म्मोऽप्यन्त-र्जलेशयः। उत्थितोऽसौ महाकायः कृत्स्नं विक्षो-भयन् सरः। यं दृष्ट्वा वेष्टितकरः पतत्येष गजो जलम्। दन्तहस्ताग्रलाङ्गूलपादवेगेन वीर्य्यवान्। विक्षोभयंस्ततो नागः सरो बहुझषाकुलम्। कूर्म्मोऽप्य-भ्युद्यतशिरा युद्धायाभ्येति वीर्य्यवान्। षड्च्छ्रितो योजनानि गजस्तद्द्विगुणायतः। कूर्म्मस्त्रियोजनोत्-सेधो दशयोजनमण्डलः। तावुभौ युद्धसम्मत्तौ पर-स्परवधैषिणौ। उपयुज्याशु कर्मेदं साधयेहितमात्मनः। महाभ्रघनसङ्काशौ तौ भुक्त्वाऽमृतमानय”।

इत्येवं पितानुशिष्टो गरुड़स्तावभक्षयत् यथाह तत्रैव ३०अ०। “भक्षयामास गरुड़स्तावुभौ गजकच्छपौ”।

**गजकृष्णा** स्त्री गज इव कृष्णा। गजपिप्पल्याम् भावप्र० गजपिप्पलीशब्दे दृश्यम्।

**गजचिर्भ(भि)टा** स्त्री गजप्रिया चिर्भ(र्भि)टा शा०त०। इन्द्र-वारुण्याम् (राखालशशा) रत्नमा०।

**गजचिर्भिट** पु० गजचिर्भिटाया इव आकारो ऽस्त्यस्य अच्। गोडुम्बायाम् त्रिका०। [राजनि०।

**गजचिर्भिटी** स्त्री गजप्रिया चिर्भिटी। १माहेन्द्रवारुण्याम्

**गजच्छाया** स्त्री“यदेन्दुः पितृ(१०)दैवत्ये सूर्य्यस्यैव करे(१३)स्थितः याम्या १४तिथिर्भवेत् सा हि गजच्छायेति कीर्त्तिता”१इत्युक्ते, “कृष्णपक्षे त्रयोदश्यां मघास्विन्दुः करे रविः। यदा तदा गजच्छाया”२इत्युक्ते च योगभेदे“द्विगुणा ह्यात्मनश्छाया दर्शे स्यादापराह्णिकी। गजच्छायेति सा प्रोक्ता इत्युक्ते ३दर्शापराह्णे च। “सैंहि यो यदा भानुं ग्रसते पर्व-सन्धिषु। गजच्छाया तु सा प्रोक्ता श्राद्धं तत्र प्रकल्प-येत्” वराहोक्ते ४सूर्य्यग्रहणकाले च कुञ्जरच्छायाशब्दे २०६८पृ०वि०। [ल्द्रायां गजोपरिस्थढक्कायाम् हारा०।

**गजढक्का** स्त्री गजोपरिस्था ढक्का। हस्तिमदसूचनार्थकृतश-

**गजता** स्त्री गजानां समूहः तल्। हस्तिसमूहे अमरः।

**गजदन्त** पु० गजस्य दन्ताविव दन्तावस्य। १गणेशे। २हस्ति-दन्ततुल्यदन्तवति त्रि०। ६त०। ३करिदन्ते पु०। गणेशस्य तथात्वं च गजाननत्वेन तत्तुल्यदन्तत्वात्। गजदन्ताकृति-त्वात् भित्तौ द्रव्यादिस्थापनार्थं गजदन्तद्वयाकारे ४नाग-दन्ते (टाण्डा) ५दन्तोपरिजातदन्ते तस्याकारेण गज-दन्ततुल्यत्वात्तथात्वम्। [याम् राजनि०।

**गजदन्तफला** स्त्री गजदन्त इव फलमस्याः। १डङ्गरीलता-

**गजदान** न० ६त०। १हस्तिमदे। तस्य प्रस्रवणस्थानञ्च “करात् कटाभ्यां मेढ्राच्च नेत्राभ्याञ्च मदस्रुतिः” पाल-काव्ये उक्तम्। ६त०। २हस्तिनो विसर्गे च। “गां पुच्छे करिणं करे इत्युक्तेः तस्य करावच्छेदेन ग्राहकेण स्पर्शनेन तस्य दानं विहितम्।

**गजनासा** स्त्री ६त०। गजस्य शुण्डे। सा इव ऊरुर्यस्याः गजनासोरु(रू) करिशुण्डतुल्यनाकारायां स्त्रियाम्। उप-मानपूर्वकत्वात् वा ऊङ्। “धर्मस्तु गजनासोरु! सद्भि-राचरितः पुरा” रामा० ७,३०,३०।

**गजपति** पु० ६त०। १श्रेष्ठगजे २अत्युच्चगजे च “गजपति द्वयसीरपि हैमनः” माघः। [स्थालीवृक्षे भावप्र०।

**गजपादप** पु० गजप्रियः पादपः शा०त०। (खुलकुड़ि) ख्याते

**गजपिप्पली** स्त्री गजोपपदा पिप्पली शाक०त०। स्वनाम-ख्यातायां पिप्पल्याम्।“चविकायाः फलं प्राज्ञैः कथिता गजपिप्पली। गजकृष्णा कटुर्वातश्लेष्महृत् वह्निव-र्द्धिनी। उष्णा निहन्त्यतीसारश्वासकण्ठामयकृमीन्” भावप्र० हरतीति शेषः। “कूर्वी निर्दहनी गाठा लङ्घनं गजपिप्पली” सुश्रुतः।

**गजपुट** पु० “हस्तप्रमाणो गर्त्तो यः पुटः स तु गजाह्वयः” इत्युक्ते औषधपाकार्थं हस्तमिते खाते गर्त्तभेदे वैद्यकम्।

**गजपुर** न० गजस्य हस्तिनामन्पस्य पुरम्। “युधिष्ठिर राजधान्याम् (दिल्ली) “स निर्ययौ गजपुराद्याजकैः परिवारितः” भा०आनु० १६७ अ०।

**गजपुष्पी** स्त्री गजस्तन्मद इव गन्धयुतं पुष्पमस्याः। नाग-पुष्प्यायां लतायां शब्दार्थचि०। “गजपुष्पीमिमां फुल्लामुत्-पाट्य शुभलक्षणाम्” रामा० कि० १।१२।३९।

**गजप्रिया** स्त्री ६त०। शल्लकीद्रुमे हेमच०।

**गजबन्धनी** स्त्री गजा बध्यन्तेऽत्र ल्युट् ङीप्। हस्तिबन्ध-नशालायां (हातिशाला) अमरः। [शालायां जटा०।

**गजबन्धिनी** स्त्री गजस्य बन्धोऽस्त्यत्र इनि ङीप्। गज-